## ।। अथ एकोनपंचाशमोऽध्याय : ।। Chapter-49

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ कौशिकादित्यमादरात् ।।
महर्षिः कौशिको यत्र सूर्यमाराधयत् पुरा ।। १

कौशिको नाम विप्रर्षिस्तीर्थयात्रापरायणः ।।
भार्यया सह मेधावी श्रीमालं क्षेत्रमागमत् ।। २

स दृष्ट्वात्र सर्वतीर्थानां क्षेत्रं च प्रवरं भुवि ।।
सूर्यस्याराधने बुद्धिं चकार मतिमान्नृप ।। ३

कुष्ठरोगाभिभूतेन कौशिकेन महात्मना ।।
कालो महानतिक्रान्तः[1] श्रूयते कौशिकाश्रमे ।। ४

अथ स ब्राह्मणो विद्वान् शुचिः स्नात्वा जितेन्द्रियः
व्रतं निरशनं गृह्य तप्तुं समुपचक्रमे ।। ५

तस्मिन्नेवाथ दिवसे निशीथे भगवान् हरिः ।।
तमस्तोममपाकुर्वन् प्रत्यक्षोऽभूद्द्विजाकृतिः ।। ६

सूर्य उवाच :- मुने कौशिक भद्रं ते वरय सुव्रत ।।
चिरमस्मादुपक्रान्तात्तपसः कुशिकान्वय ।। ७

-०-

१ बी कालो बहुरतिक्रान्तः श्रूयते

कौशिक उवाच :-तपोभि: सुचिरं तप्तैर्मुनीनां पारदृष्टिनाम्[१]
दर्शनं यासि मार्तण्ड स्व: किं वरदोसि मे ।। ८

अथ पूर्वेन्हि येनासीत् प्रत्यक्षो मम भास्कर: ।।
कारणं तन्ममाचक्ष्व प्रार्थयामि वरं तत: ।। ९

विवस्वानुवाच :-एषा पतिव्रता पत्नी तव कौशिकवन्दिता ।।
अहोरात्राणि दश मामुदक्तं हि निराकरोत् ।। १०

तेनाहमुपवासेन त्वत्प्रियाया द्विजोत्तम ।।
एकेनापि प्रसन्नोऽस्मि वरं वरय मा चिरम् ।। ११

कौशिक उवाच :- उपवासान्मयासार्धमियं ते कुरुते बहून्
तत: किमप्रियं ते स्यादुदितस्य सुरैरपि[२] ।। १२

विवस्वानुवाच :- सत्येऽधिका द्विजश्रेष्ठ देवेभ्योऽपि न संशय: ।
अस्यां तपस्यमानायां तेजोहानिर्भवेन् मम ।। १३

तत्पोभिर्न पुण्यं स्यात्कल्पान्त विहितैरपि
न सुतीर्थै नृणां[३] दानै: सतीत्वे यादृशेन्नृणाम् ।। १४

-o-o-

२ बी तत: किमप्रियं तस्या वदत्वं हि सुरेश्वर ।।
१ ए पारदर्शिनाम्
३ ए नृणां

स्त्रियः सत्यस्य संस्थानं सत्यो धर्मश्च शाश्वतः
सत्यश्च भुवनाधाराः सत्यो वै लोकमातरः ।। १५

कौशिक उवाच :- सतीत्वं स्यात्किह स्त्रीणां कथं वै च दिवाकर ।।
संक्षेपेण ममाचक्ष्व सर्वज्ञानमयोसि यत् ।। १६

विवस्वानुवाच :- पिता माता सुहृन्मंत्री भृत्यश्चामात्य एव च ।।
सर्वमेव पतिर्यासां सत्यस्ता लोकमातरः ।। १७

सुगृहीतं मनो यासामन्यत्र सततं द्विज ।।
पतौ भवेदनिस्फीतं ताः सत्यो लोक मातरः[1] ।। १८

वेदानधीत्य शास्त्राणि विमृश्य ब्रह्मचारिणः ।।
जितं चित्तं च रोधाय परं सत्यो निसर्गतः[2] ।। १९

अधिका ब्रह्मचारिभ्यो विद्यान् यतिभिः सह ।।
भुञ्जाना अपि लोकेऽस्मिन् मनसोऽस्य विनिग्रहात् ।। २०

अधस्ताद्ब्रह्मचारिणां लोकाः प्रान्ते द्विजोत्तम ।।
उपरिष्टात्सतीनां तु तेन सत्योऽधिकाः स्मृताः ।। २१

-०-

१ बी श्लोक -
-१८ बी नास्ति
२ बी यतन्ते चिरोधाय परं सत्यो निसर्गतः

कौशिक उवाच :- फलं सत्या: सतीत्वस्य यदि स्यादतुलं प्रभो
तपसा सुचिरेणापि कथं सिध्यति तत्पति: ।। २२

विवस्वानुवाच :- ततपस्तानि तीर्थानि तानि दानानि च द्विज ।।
पुंसां यदि भवेत्पत्नी सह सा धर्मचारिणी ।। २३

= भूय: साप्तपदीनेन मैत्रेणानेन ते द्विज ।।
तुष्टो दास्यामि याचस्व वरद्वयमिहेप्सितम् ।। २४

कौशिक उवाच :- यदि तुष्टोसि मे सूर्य नि: शेषभुवनेक्षण ।।
अत्र नित्यं स्थिति: कार्यात्त्वया लोकहिताय वै ।। २५

विवस्वानुवाच :- पुनर्ब्रूहि वरं विप्र यत्ते मनसि वर्तते ।।
स्थितिमत्र करिष्यामि वचनात्तव नान्यथा ।। २६

कौशिक उवाच :- यथा राजा भवेन्नाथलोके शास्ता दुरात्मनाम् ।।
तथा त्वमुग्रकर्माणामिह[1] मुर्वात्मन: कलाम् ।। २७

विवस्वानुवाच :- एवमस्तु मुनिश्रेष्ठ यत्स्थायी तिवर्तत्व
कला द्वादश विख्याता मम लोके प्रकाशिता ।। २८

-०-

१– उग्रकार्यणामिह: ऐसा पद होना चाहिए ।

या भवेदुत्तमा[1] तासां तयात्र स्थितिरस्तु मे ।।
यो चैयिष्यति मां विप्र श्रीमाले भक्ति भास्कर: ।। २६

तस्मै तुष्ट: प्रदास्यामि मनसा वांछितं क्षणात् ।।
रोगा विवर्चिकाकुष्ठ राजयक्ष्मादयो[2] द्विज ।। ३०

नाशं यास्यन्ति मर्त्यस्य मम सप्ताहदर्शनात्
मत्पदाम्भोजनिस्येन्द[3]जलधौतानि देहिनाम् ।। ३१

दुद्रु[4]मण्डलकादीनि नाशं यास्यन्ति तत्क्षणात् ।।
आराधितोस्मि मुनिना कौशिकेन महात्मना ।। ३२

तेनेह कौशिकादित्य: ख्यातो लोके भविष्यति ।। ३३
वसिष्ठ उवाच :- इत्युक्तवा कौशिकं विप्रं रविरन्तर्हितो भवेत् ।।
कौशिको वै प्रतिष्ठाप्य तत्र देवं दिनेश्वरम् ।। ३४
अभ्यर्च्य विधिवद्भक्त्या स्थित: सुचिरमात्मवान् ।।
एवमासीत् पुरा विप्र भगवान्विश्वभावन: ।। ३५

-o-o-

१ ए मां
२ ए राजक्ष्मादयो द्विज
३ ए निस्पंद
४ ए दुद्रु

आर्तिहन्ता मनुष्याणाम् कौशिकादित्यसंज्ञया ।।
रोगार्तः श्रृणुयान्मर्त्यो य इमं सूर्यसंभवम् ।। ३६

स सद्यो मुच्यते रोगात् सत्यमेतद्ब्रवीम्यहम् ।। ३७

-०-

इति श्री०विवस्वन्माहात्म्य नाम एकोनपंचाशत्तमोऽध्यायः
४६ ।।